श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकृष्णब्रह्मतन्त्रपरकालयतीन्द्र अनुगृहीतं

# ॥ श्री प्रपन्नामृतस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness* śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री प्रपन्नामृतस्तोत्रम् ॥

कलयतु कल्याणगुणं कमलाकुचकुङ्कुमाङ्कितोरस्कम्।
यदुवंशमौक्तिकं तत्किमपि महस्सर्वदाऽपि मम हृदयम्॥ 1 ॥

वन्दे तं देवसुतं वसुदेववधूस्तनन्धयं कमपि।
वरदं वरेण्यशीलं वल्लवभवनात्तलीलमिह बालम्॥ 2 ॥

व्रजरचितकेळिसुदतीव्रजहृदयानन्दकन्दळं किमपि।
व्रज हृदय दिव्यतेजो वृजिनतमोमूलभेदनपटिष्ठम्॥ 3 ॥

लीलामुदितयशोदं ललितप्रस्निग्धमुग्धतरवादम्।
आकुञ्चितैकपादं भज तेजः किमपि विरचिताह्लादम्॥ 4 ॥

हृदयनवनीतचोरं पारदतरळाङ्घ्रिकमलसञ्चारम्।
परिलुलितगोपदारं गृहाण यत्नेन कमपि सुकुमारम्॥ 5 ॥

गोपवधूभोगार्हं शेखरितानर्घबर्हिवरबर्हम्।
घनविभवपारिबर्हं कलये हृदये चिराय दाशार्हम्॥ 6 ॥

गोखुरविदारितावनिधूळीधूसरितकुन्तलमुदारम्।
सञ्चिन्तयेऽन्तरङ्गे सकुमारं कमपि वल्लवकुमारम्॥ 7 ॥

कमपि घनाघननीलं गोपवधूटीकुचग्रहविलोलम्।
कलयामि गोपबालं लोलालकजालमधुकरितफालम्॥ 8 ॥

कुन्दविनिन्दनरदनान्मन्दितपूर्णेन्दुबिम्बरुचिवदनान्।
मुनिहृदयकेळिसदनान्व्रजविभवांस्तान्भजे विधुतमदनान्॥ 9 ॥

नन्दानन्दनचन्दन मुचुकुन्दानन्दकन्द गोविन्द।
मम विन्द हृदरविन्दं मिळिन्दसुन्दर मुकुन्द ननु मन्दम्॥ **10** ॥

किमपि यशोदाभाग्यं व्रजललनापृथुलकुचयुगीभोग्यम्।
रक्षामि नीलरत्नं रमणीयं हृदयसंपुटे नूत्नम्॥ **11** ॥

मुरळीनिनादरसभरतरळीकृततर्णकव्रजो भजताम्।
कोऽपि घनाघनशाबः कोमळरूपोऽद्य दहरगहनं मे॥ **12** ॥

काळिन्दीपुळिनान्तरकलितविहारं मनोज्ञमणिहारम्।
तेजः किमपि विलीनं जागर्तु मदीयहृदि रुचिरलीलम्॥ **13** ॥

कानपि भजे विलासान् कलितव्रजसुन्दरीरुचिररासान्।
राधाकटाक्षदासान् राकासितकिरणसखहासान्॥ **14** ॥

अतिमुग्धं दधि लब्धुं सुस्निग्धं वस्तु किमपि मम सिद्धम्।
चारुमुखं तारसखस्मेरनखं तच्चिरादपारसुखम्॥ **15** ॥

विकटातिदर्पदुर्मदशकटासुरधूतिधुर्यचरणतलम्।
प्रकटानुरागरुचिरं सुकटाक्षान्मयि तनोतु तत्तेजः॥ **16** ॥

यमुनाकूलविहारं यमिनामधुनाऽपि हन्त बहुदूरम्।
महदच्युतकैशोरं मम हृदि वितनोतु नित्यसञ्चारम्॥ **17** ॥

बहुतरतरङ्गघट्टितयमुनाशुक्त्युदरगळितमिव नीलम्।
मुक्ताफलं प्रविचलत्तत्र विचित्रं विभावये हृदये॥ **18** ॥

सोमाननगोपीजनकौमारहरं प्रवाळलसदधरम्।
तरुणं कमपि मनोहरचरणं शरणं भजे धृताभरणम्॥ **19** ॥

खञ्जितगोपीहृदयं रञ्जितभुवनं श्रयामि गोपशिशोः।
सञ्जीवितगोसन्तति मञ्जुळमञ्जीरशिञ्जितं नृत्तम्॥ **20** ॥

काळियफणमणिमध्ये नीलतरं नूत्नजातमिवरत्नम्।
तन्मूर्धन्यस्तपदं चूडालङ्करणमस्तु धाम मम॥ 21 ॥

सितकरकिरणत्रस्यद्गोपीरतिकेळिरचिततिमिरभरम्।
तत्किमपि धाम हृदये नीलतरं नस्तमो निराकुरुताम्॥ 22 ॥

निर्मलतरमतिशिशिरं निरुपममवगाहतां मनोरुचिरम्।
नन्दकिशोरमनोहरशरीरतेजः कळिन्दजापूरम्॥ 23 ॥

मह इह मनसि विलग्नं मणिमयकाञ्चीमनोहरवलग्नम्।
गोपीकटाक्षमग्नं गोप्तुं क्षममेवमां भवविविग्नम्॥ 24 ॥

विन्दे पदारविन्दे मन्देतरविभवदे कृतानन्दे।
नन्दकुलामन्दकला बृन्दविलासस्य कस्यचिद्धाम्नः॥ 25 ॥

इति महिशूरपुरोत्तमनरपतिचामेन्द्रभूपकुलगुरुणा।
कलिता स्तुतिर्विजयतां श्रीकृष्णब्रह्मतन्त्रकलिरिपुणा॥ 26 ॥

॥ श्री प्रपन्नामृतस्तोत्रं समाप्तम्॥